ओ३म्

Second Semester ; M.A. Sanskrit ; P.G. Course

के छात्रों के लिए Paper CC-IX (रूपक / मुद्राराक्षस )

से सम्बद्ध पाठ्य सामग्री . . . . .

पाठनिर्माण कर्ता विशेषज्ञ :

DR. C.S.R. Linga Reddy
Assistant Professor
Sanskrit Department
B.N. College ; Patna University
Mob. No. 9760525164 ; 9410773430
Email – csrlr77@gmail.com

पाठस्य नाम

## कविर्विशाखदत्तः मुद्राराक्षसं च

महाकविभासप्रभृतिषु संस्कृतनाटककारेषु कवेर्विशाखदत्तस्य अद्वितीयं स्थानं विलसति। संस्कृतनाटकेषु विशाखदत्तस्य मुद्राराक्षसं नाम नाटकं स्वीयकूटनीतिप्राधान्यराजनीतिविषयाधारेण सहृदयेषु औत्सुक्यजननेन चञ्चलेव चमत्करोति तमाम्। तत्रत्य कूटनीतेरगाधगाम्भीर्यं मानवबुद्धेः कल्पनया नास्ति शक्यम्। मुद्राराक्षसस्य नाटककारः विशाखदत्तः स्वपरिचयविषये प्रस्तावनायां सूत्रधारमाध्यमेन सूचयति – "अद्य सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनोः कवेः विशाखदत्तस्य" इति। कविर्विशाखदत्तः सामन्तस्य वटेश्वरदत्तस्य पौत्रः, महाराज इत्युपाधिधारिणः पृथोः सूनुरिति अर्थशः ध्वन्यते। राजनीत्यां विशेषतः कौटिल्यार्थशास्त्रे शुक्रनीत्यां चायं कविरतीव विशारदः प्रकाण्डपण्डितो वा वेविद्यते। न्याये ज्योतिषे चास्य तलस्पर्शि पाण्डित्यं हस्तामलकवद् समीक्षकैः प्रतिपाद्यते। वैदिकधर्ममतानुयाय्यपि असौ बौद्धमतं प्रत्यादरवानस्ति। विद्वद्भिः मनीषिमूर्धन्यैः अनेकप्रमाणैः समीक्षणानन्तरमस्य कवेर्विशाखदत्तस्य विशेषनाटकस्य मुद्राराक्षसस्य रचनाकालः षष्ठशताब्द्याः उत्तरार्धः इति निश्चीयते। अतः कविर्विशाखदत्तः

षष्ठशताब्द्याः मध्यकालतः स्यादिति निष्कर्षः।
मुद्राराक्षसस्य मुख्योद्देश्यः राजनीतिरेवास्ति। तत्रत्य प्रत्येकघटनाजातमपि तदेव सङ्केतयति। विशाखदत्तस्य नाटकेऽस्मिन् आहत्य सप्त अङ्काः सन्ति। सम्राजः चन्द्रगुप्तस्य अमात्यपदे राक्षसं स्थापयितुमाचार्यचाणक्यः स्वीयबौद्धिकचाकचक्येन प्रयततेतमाम्। तत्रैव नन्दामात्यः राक्षसः नन्दसंहारस्य प्रतिशोधार्थी असौ नापि चाणक्यं द्रष्टुमपीच्छति न वा चन्द्रगुप्तम्। राक्षसः पौरवराजकुमारेण मलयकेतुना सह संयुज्य चन्द्रगुप्तं राज्यच्युतं कर्तुं योजयति। निपुणकमाध्यमेन राक्षसस्य मुद्रां स्वीयाधीनं करोति चाणक्यः। अन्ततोगत्वा तयैव मुद्रया गृहीतो भवति राक्षसः। अत एव मुद्रया गृहीतः राक्षसः यस्मिन्नाटके तन्नाटकं मुद्राराक्षसमिति संज्ञयति विशाखदत्तः। नाटकेऽस्मिन् विशाखदत्तस्य विशिष्टपदरचनायाः शक्तिमत्ता सुरूपष्टता च श्लाघनीये स्तः। अत्रत्य समरोचितं नाटकस्वरूपं रचनाशैल्याः स्वच्छता धाराप्रवाहिता च मुहुर्मुहुः सहृदयहृदयानि रससागरे निमज्जयन्ति। मुद्राराक्षसस्य संस्कृतं परम्पराप्रतिष्ठितमस्ति। तत्रैवात्र प्राकृतत्रयस्य प्रचुरप्रयोगः दरीदृश्यते — शौरसेनी, महाराष्ट्री मागधी च। अत्र सर्वाधिकछन्दांसि प्रयुक्तानि सन्ति — शार्दूलविक्रीडितम् (39), स्रग्धरा (25), वसन्ततिलकम् (19) शिखरिणी, अनुष्टुप् श्लोकः (22) च। अत्र नाटके कविर्विशाखदत्तः पात्राणि युगलरूपेण चित्रयामास — चाणक्यराक्षसौ, चन्द्रगुप्तमलयकेतू। चन्दनदासः, जीवसिद्धिः, भागुरायणः, शकटदासः, सिद्धार्थकः, निपुणकः इत्यादीनि पात्राणि सन्त्यत्र। चन्दनदासस्य स्त्री एकमेव स्त्रीपात्रमस्ति। नात्र कापि नायिका राजते न वा शृङ्गाररसः। अन्ततः राक्षसः अमात्यपदं स्वीकरोति। योग्यः राजा चन्द्रगुप्तः योग्यश्च मन्त्री राक्षसः संयुक्तौ। अत्र आचार्यचाणक्यस्य त्यागः राष्ट्रभक्तिश्च प्रकाशिते स्तः। कवेः विशाखदत्तस्यापरं नाटकं देवीचन्द्रगुप्तमस्ति। अतः कविर्विशाखदत्तः असाधारणः नाटककारः इति सिद्ध्यति। इति शम्॥